लवणः, त्रि, ( लवणेन संसृष्टः । लवण + ठक् । "लवणात् लुक् ।" ४ । ४ । २४ । इति ठको लुक् । यद्वा, लवणो रसोऽस्यास्मिन्निति । अर्श आद्यच् । ) लवणरसयुक्तः । इति मेदिनी । णे, ७५ ॥ ( यथा, सुश्रुते । १ । २१ ।
"मधुरश्चविदग्धः स्याद्विदग्धो लवणः स्मृतः ॥")
लावण्ययुक्तश्च ॥

लवणकिंशुका, स्त्री, महाज्योतिष्मती । इति राजनिर्घण्टः ॥

लवणक्षारः पुं, (लवणस्य क्षारः ।) लोणारक्षारः । इति राजनिर्घण्टः ॥

लवणखानिः, स्त्री, ( लवणस्य खानिः खनिः । ) शाम्भरिलवणोत्पत्तिस्थानम् । तत्पर्य्यायः । रुमा २ । इति हेमचन्द्रः । ४ । ७ ॥ लवणाकरमात्रञ्च ॥

लवणतृणं, क्ली, (लवणरसविशिष्टं तृणम् ।) तृणविशेषः । तत्पर्य्यायः । लोमतृणम् २ तृणाम्लम् ३ पटुतृणकम् ४ अम्लकाण्डम् ५ । अस्य गुणाः । सक्षीरत्वम् । अम्लत्वम् । कषायत्वम् । अस्तन्यत्वम् । अग्निवृद्धिकरत्वञ्च । इति राजनिर्घण्टः ॥

लवणत्रयं, क्ली, ( लवणानां त्रयम् । ) सैन्धवं विड़ं रुचकञ्च । इति राजनिर्घण्टः ॥

लवणधेनुः, स्त्री, (लवणनिर्म्मिता धेनुः ।) दानार्थलवणादिनिर्म्मितधेनुः । तद्विवरणं यथा,—

होतोवाच ।

"लवणधेनुं वक्ष्यामि तां निबोध महीपते ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुं लवणमयीं कृत्वा षोड़शप्रस्थसंयुताम् ।
वत्सं चतुर्भी राजेन्द्र इक्षुपादांश्च कारयेत् ॥
सौवर्णसुखशृङ्गाणि खुरा रौप्यमयास्तथा ।
सुखं गुड़मयं तस्या दन्ताः फलमया नृप ! ॥
जिह्वां शर्करया राजन् घ्राणं गन्धमयन्तथा ।
नेत्रे रत्नमये कुर्य्यात् कर्णौ पत्रमयौ तथा ॥
श्रीखण्डं शृङ्गकोटौ च नवनीतमयाः स्तनाः ।
सूत्रपुच्छां ताम्रपृष्ठां दर्भरोममयीं पयस्विनीम् ॥
कांस्योपदोहां राजेन्द्र घण्टाभरणभूषिताम् ।
सुगन्धपुष्पधूपैश्च पूजयित्वा विधानतः ।
आच्छाद्य वस्त्रयुग्मेन ब्राह्मणाय निवेदयेत् ॥
ग्रहणे वाथ संक्रान्तौ व्यतीपाते तथायने ।
नक्षत्रग्रहपीड़ासु सर्व्वकालं प्रदापयेत् ॥
द्विजाय साधुवृत्ताय कुलीनाय च धीमते ।
वेदवेदाङ्गविदुषे श्रोत्रियायाहिताग्नये ॥
ईदृशाय प्रदातव्या तथामत्सरिणे नृप ! ।
अग्रतस्तेन मन्त्रन्तु पुच्छदेशोपरिस्थितः ॥
कृत्वोपानहौ दद्यां मुद्रिकापर्णपत्रके ।
आच्छाद्य वस्त्रयुग्मेन दक्षिणां कनकं ददेत् ॥
पूर्व्वोक्तेन विधानेन स्वशक्त्या कनकेन तु ।
इमां गृहाण भो विप्र रुद्ररूपे नमोऽस्तु ते ॥
रसज्ञा सर्व्वभूतानां सर्व्वदेवनमस्कृता ।
कामं कामदुघे कामा क्षारधेनो नमोऽस्तु ते ॥
दत्त्वा धेनुं लवणेन एकाहश्चैव तिष्ठति ।
स्वयं त्रिरात्रं विप्रेण तथैव लवणाशिना ॥
सहस्रेण शतेनाथ स्वशक्त्या कनकेन तु ।
दत्त्वेमां स्वर्गमाप्नोति यत्र देवो वृषध्वजः ॥
य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः ।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकञ्च गच्छति ॥"

इत्यादि वाराहपुराणे श्वेतोपाख्याने लवणधेनुमाहात्म्यम् ॥

लवणमदः, पुं, ( लवणस्य मदः । ) लोणारक्षारः । इति राजनिर्घण्टः ॥

लवणा, स्त्री, ( लुनाति या । लू + ल्युः । टाप् । ) नदीभेदः । दीप्तिः । इति मेदिनीशब्दरत्नावल्यौ ॥ महाज्योतिष्मती । इति राजनिर्घण्टः ॥

लवणाचलः, पुं, (लवणनिर्म्मितः अचलः ।) दानार्थलवणादिनिर्म्मितपर्व्वतः । यथा,—

"अथातः संप्रवक्ष्यामि लवणाचलमुत्तमम् ।
यत्प्रदाता नरो लोकं प्राप्नोति शिवसंयुतम् ॥
उत्तमः षोड़शद्रोणः कर्त्तव्यो लवणाचलः ।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः ॥
वित्तहीनो यथाशक्त्या द्रोणादूर्द्ध्वन्तु कारयेत् ।
चतुर्थांशेन विष्कम्भान् पर्व्वतान् कारयेत् पृथक् ॥
विधानं पूर्व्ववत् कुर्य्यात् ब्रह्मादीनाञ्च सर्व्वदा ।
तद्वद्धेमतरून् सर्व्वान् लोकपालान्निवेशयेत् ॥
सरांसि कामदेवादींस्तद्वच्चात्र निवेशयेत् ।
कुर्य्याज्जागरमत्रापि दानमन्त्र निबोधत ॥
सौभाग्यरससम्भूतो यतोऽयं लवणो रसः ।
तदात्मकत्वेन च मां पाहि पापान्नगोत्तम ॥
यस्मादन्नरसाः सर्व्वे नोत्कटा लवणं विना ।
प्रियश्च शिवयोर्नित्यं तस्मात् शान्तिप्रदो भव ॥
विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनम् ।
तस्मात् पर्व्वतरूपेण पाहि संसारसागरात् ॥
अनेन विधिना यस्तु दद्याल्लवणपर्व्वतम् ।
उमालोके वसेत् कल्पं ततो याति परां गतिम् ॥"

इति मात्स्ये ७७ अध्यायः ॥

लवणाब्धिजं, क्ली, ( लवणाब्धौ लवणसमुद्रे जायते इति । जन् + डः । ) सामुद्रलवणम् । इति राजनिर्घण्टः ॥

लवणारजं, क्ली, लोणारक्षारः । इति राजनिर्घण्टः ॥

लवणोत्तमं, क्ली, ( लवणेषु उत्तमम् । ) सैन्धवम् । इति रत्नमाला ॥

लवणोत्थं, क्ली, (लवणादुत्तिष्ठतीति । उत् + स्था + कः । ) लोणारक्षारः । इति राजनिर्घण्टः ॥

लवणोदः, पुं, ( लवणं उदकं यस्य । उत्तरपदस्य चेत्युदकस्योदादेशः । ) लवणसमुद्रः । इत्यमरः ॥

लवनं, क्ली, ( लू + भावे ल्युट् । ) छेदनम् । इत्यमरः ॥

लवनी, स्त्री, फलवृक्षविशेषः । लोना इति भाषा ॥ तत्पर्य्यायः । शीघ्रजा २ अग्रिमा ३ । इति शब्दचन्द्रिका ॥

लवली, स्त्री, ( लवं लेशं लातीति । ला + कः । गौरादित्वात् ङीष् । ) फलवृक्षविशेषः । नोयाड़ि इति भाषा । तत्पर्य्यायः । सुगन्धमूला २ पाण्डुः ३ कोमलवल्कला ४ । इति राजनिर्घण्टः ॥ तस्य फलगुणाः । हृद्यत्वम् । सुगन्धित्वम् । कफवातनाशित्वञ्च । इति राजवल्लभः ॥

"लवलीफलमर्शोघ्नं वातपित्तहरं लघु ॥"

इति केचित् ॥

( यथा, राजेन्द्रकर्णपूरे । ४७ ।
"कृत्वा वेलापुलिनलवलीपल्लवग्रासगोष्ठीं
दिङ्मातङ्गाः सममथ सरिन्नाथपाथः
पिबन्ति ॥")

लवाकः, पुं, (लवार्थं छेदनार्थं अकतीति । अक + अच् । ) छेदनद्रव्यम् । इत्युणादिकोषः ॥

लवाणकः, पुं, ( लूयतेऽनेनेति । लू + "आणको लूधूशिङ्घिधाञ्भ्यः ।" उणा० ३ । ८३ । इति आणकः । ) दात्रादिः । इत्युणादिकोषः ॥

लविः, त्रि, ( लूयतेऽनेनेति । लू + "अच इः ।" उणा० ४ । १३८ । इति इः । ) छिद्वरः । इत्युणादिकोषः ॥

लवित्रं, क्ली, ( लूयतेऽनेनेति । लू + "अर्त्तिलूधूसूखनसहचर इत्रः ।" ३ । २ । १८४ । इति इत्रः । ) दात्रम् । इत्यमरः ॥

लश, क शिल्पयोगे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् । ) क, लाशयति कुशलो नृत्ये शिल्पं युनक्तीत्यर्थः । इति दुर्गादासः ॥

लशुनं, क्ली, ( अश्यते भुज्यते इति । अश् + "अशेर्लश च ।" उणा० ३ । ५७ इति उनन् । लशादेशश्च धातोः । ) रसुनः । तत्पर्य्यायः । महौषधम् २ गृञ्जनः ३ अरिष्टः ४ महाकन्दः ५ रसोनकः ६ । इत्यमरः ॥ रसोनः ७ म्लेच्छकन्दः ८ भूतघ्नः ९ उग्रगन्धः १० । अस्य गुणाः । अम्लरसेन ऊनत्वम् । गुरुत्वम् । उष्णत्वम् । कफवातनाशित्वम् । अशुचित्वम् । क्रिमिहृद्रोगशोफघ्नत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च ।

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् ।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥
यदामृतं वैनतेयो जहार सुरसत्तमात् ।
तदा ततोऽपतद्विन्दुः स रसोनोऽभवद्भुवि ॥
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्ज्जितः ।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः ॥
कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ॥
बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः ।
रसोनो वृंहणो वृष्यो स्निग्धोष्णः पाचनः
सरः ॥
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ।
भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तास्रवृद्धिदः ।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥
हृद्रोगजीर्णज्वरकुक्षिशूल
विबन्धगुल्मारुचिकासशोफान् ।
दुर्नामकुष्ठानलसादजन्तु-
समीरणश्वासकफांश्च हन्ति ॥